(सुन्दरी तापिन्युपनिषत्)

अथर्व०

St. C. P. 37

श्रीविद्योपनिषत् महोपनिषद्

पत्राणि १८

नं० १०२२-घ

संवत् १९६५

(त्रिपुरातापिन्युपनिषद्)

नं० १०२३ घ

सुन्दरीतापिन्युपनिषत्

१८ पत्राणि

उपनि० सं० - लेखनी

१०२३

श्री· १

ॐश्रीगणेशायनमः श्रीविद्योपनिषत् ॐअथैतस्मिन्नंतरेभगवान्प्रजाप
त्यंवैष्णवंविलयकारणंरूपमाश्रित्य त्रिपुराभिधाभगवत्येवमादिश्यत्य भूर्भु
वःस्वस्त्रीणिपुराणिस्वर्गभूःपातालाख्यानि त्रिपुराणिकरोमायात्मकेनक्रीका
रेणस्थूलेखाख्यात्रिपुराभगवतीत्रिकूटावसानेनिलयेविलयेधाम्निमहसाख्ये
रेणाख्यास्तितिसैवेयंभगवतीत्रिपुरेतिव्याख्यायते ॐतत्सवितुर्वरेण्यंभर्गोदेवस्य
धीमहिधियोयोनःप्रचोदयात्परोरजसेसावदों जातवेदसेसुनवामसोम
मरातीयतोनिदहातिवेदः सनःपर्षदतिदुर्गाणिविश्वानावेवसिंधुंदुरितात्य
ग्निः त्र्यंबकंयजामहेसुगंधिंपुष्टिवर्धनं उर्वारुकमिवबंधनान्मृत्योर्मुक्षीय
मामृतात् शातोदरीयपरमाविद्यात्रयीमयीसाष्टार्णात्रिपुरापरमेश्वरी आद्या
निचत्वारिपदानिपरब्रह्मविकसितानि द्वितीयानिशाद्याख्यानितृतीयानिसे २

वाख्यानि तत्रलोकावेदाःशास्त्राणिपुराणानिधर्माणिवैद्यविकित्सितानि
ज्योतींषिचशिवशक्तियोगादित्येवंयत्तनाख्यायते अथैतस्मिन्नंतरेपरमेशः
स्वेच्छयाख्याताभोमदनामनुसमुद्भवंतदितिब्रह्मशास्त्रतंपरोभगवान्निर्लक्षणो
निरंजनोनिरुपाधिरादिरहितोदेवउन्मीलतिपश्यतिविकासयति तत्त्वेतत्त्व
भावंकामयति सएवंदेवःशिवद्रुपीहश्यत्वेनविकासतेयतिशुद्धयत्तेशुद्धयोगिशु
कामंकामयति कामंकामोजायतेकामिनीजायते अकचटतपयशान्स्रज्यते
सकामोजायतेसएवनिरंजनःकामत्वेनोज्जृंभते कामोजायतेतस्मादीश्वरकामो
भिधीयतेकामंकामयति तत्परिभाषयाकामःककारंप्राप्नोति कामदेवंतदि
तिककारोगद्यते तस्मात्तत्पदार्थइत्येवंवेद १ सवितुर्वरेण्यमितिषट्प्राणिप्र
सवेसविताप्राणिनःसूतेप्रसूतेशक्तिर्यास्तुतेत्रिगुणाशक्तिराद्येयं त्रिगुणापरा

श्री॰ मेश्वरी महाकुंडलिनीदेवीजातवेदसमंडले योधीतेमसर्वंआमुने त्रिको
२ णाधाक्तिरेकारेणमहाभगेनभगाकारेणप्रस्तूते तस्मादेकारएवगृह्यते व
रेण्यंश्रेष्ठंभजनीयमक्षरंनमस्कारणीयं तस्माद्वरेण्यमेकाक्षरंगृह्यतेयए
वेवेद २ भर्गोदेवस्यधीमहीइतिव्याख्यास्यामिथकारेऽक्षारणंधीत्येवंधार्यते
भगवान्परमेश्वरोसर्वांतर्भूतंतुरीयाक्षराकारंपदानांमध्यवर्तित्वेनव्याख्या
तेभर्गोदेवस्यरूपंव्याचक्षते तस्माद्भर्गोदेवस्यधीत्येवमीकाराक्षरंगृह्यते उ
महीत्यस्यव्याख्यानंमहत्वंकाठिन्यंविद्यते यस्मिन्नक्षरेतन्महीलकारपरं
धामकारुण्यपाख्यंससागरंसपर्वतंसद्वीपंसकाननंसमुलुसद्रुमंडलमेवो
क्तलकारेणपृथिवीदेवीमहीत्यनेनव्याचक्षते धियोयोनःप्रचोदयादित्य
नेन परमात्मासदाशिवप्रादिभूतःपरस्याणुरूपेणलकारेणज्योतिर्लिंग २

मात्मानंधियोबुद्धयःपरवस्तुनिध्यानेकाररहितेनिर्विकल्पेप्रचोदयात्प्रे
रयेदित्युच्चाररहितंचेतसैवचिंतयित्वाभावयेदितिपरोरजसेसावदोंमि
तितदवसानेरमलंधामहृदिदैवतंचैतन्यंचिल्लिंगहृदयागारवासिनीहृ
ल्लेखेत्यादिनास्पष्टंवाग्भवकूटंपंचाक्षरंपंचभूतजननंपंचकलालयंव्या
चक्षते इत्येवंवेद ४ अथातोपरंकामकलाभूतंकामराजकूटंव्याख्यास्यामः
तत्सवितुर्वरेण्यमित्यादिद्वात्रिंशदक्षरीपठित्वा तदितिपरमात्मासदा
शिवोक्षरंविमलंनीरूपाद्यतादात्म्यप्रतिपादनेनहकाराक्षरंशिवरूपंस
काररूपंनिरक्षरमक्षरंव्यालिख्यते इति तत्पदव्याकृतिमादायशक्तिंदर्श
यति तत्सवितुरितिसर्वेर्णाधनात्सूर्यार्थस्थंद्विकाव्यालिख्यते मूलादित्र
लयंप्रांतंग्रथितनादक्षरद्वयमाचक्षेत्याहभगवान् तदेवशिवशक्त्यात्मका

श्री· २
3

मावेदितं शिवोयंपरमंदेवंशक्तिरेषातज्जीवजा सूर्याचंद्रमसोर्योगाद्ध
सस्तत्पदमुच्यते तस्माद्धंसंभतेकामः कामीकामंशिवःपरः वरेण्यंयंकाम
देवोयंवरेण्यंभर्गउच्यते तत्सवितुर्वरेण्यंभर्गोक्षरंसेवनीयमक्षरंसमुद्भ
वत्तंपरमात्मजीवात्मनोर्योगादितिस्पष्टमक्षरंचिंतयंतसकांतइतिदेवस्य
सदाशिवस्यसदाशिवएवनिष्कलोदेवोअक्षरंव्याक्रियते परमंपदंधीय
द्वारेणविद्यतेजडत्वंधारणामहीतिलकारःशिवाधस्ताद्धकाराल्लकारएवस्य
ष्टीकृतमेत्याक्षरंपरमचैतन्यंधियोयोनःप्रचोदयात्परोरजसेसावदोमि
त्येवंकृत्वंकामकलालयंषडध्वपरिवर्तकंवैश्वंपरंधामेतिभगवान्वेत्तस्मा
द्यएवंवेद ५ अथैतस्मादपरंतत्तीयंशक्तिकूटंप्रतिपद्यते द्वात्रिंशदक्षरयोगा
दयाः तत्सवितुर्वरेण्यंतस्माद्वात्मनआकाशःसंभूत आकाशाद्वायुःस्फार २

तितदर्थानेवरेण्यंपसमुत्पद्यमानंतत्सवितुर्वायोजीवात्मपरमात्मसमुद्भ
वंतप्रकाशशक्तिरूपंस्वधारूपंजीवात्मनरेस्यरूपमापद्यते भर्गोदेवस्यधीमही
त्यनेनाधाररूपीशिवात्मात्मनरेभएपते तदपरंधीमहीत्यनेनशेषंवरेण्यंपका
म्यकमनीयंरूपंतत्तीयंशक्तिकूटंव्याप्यस्पष्टीकृतमित्येवंपंचदशात्मनरंत्रैपुरे
योधीतेससर्वान्कामानाप्नोति ससर्वान्भोगानाप्नोति ससर्वाँल्लोकाञ्जयति
ससर्वावाचोविजृंभयति सरुद्रत्वंप्राप्नोति सवैष्णवंधामभित्वापरंब्रह्मप्रा
प्नोतियएवंवेद ८ इत्याद्यामभिधायाथैतस्याःशक्तिकूटमादायशिवेनसं
योज्यैतेनप्रथमकूटेनलोपामुद्रेयं १ द्वितीयेथाग्निरूपेवैणवमनुना विद्धरूपी
नाशक्तिभूतरुल्लोवांकाक्षीधामनुनाधिष्ठिता २ तृतीयेथाग्निरूपेवसाए
वविद्यायावद्दाम्भवंकूटंतेनमानवीचांद्रीकौवेरीविद्यामावदन्ते माधवीना

श्री०

५

धः शिवं वाग्भवं तदूर्ध्वं कामकलालयं शक्त्यूर्ध्वं शाक्तमिति मानवी विद्या २ च
तुर्थे धाम्नि शिवशक्त्याद्यं वाग्भवं तदूर्ध्वं शिवशक्त्याद्यं चाधः शिवं मादनं द्विती
यं तृतीयं शिवशक्त्याद्यं चान्द्री विद्या ४ पंचमे धाम्नि हंसाद्यं वाग्भवं प्रथमं हंस
हंसाद्यं मादनाद्यं द्वितीयं हंसाद्यं वाग्भवं तृतीयं कौवेरी विद्या ५ षष्ठे धाम्नि शै
वसंज्ञा व्याचक्षते इत्येवं वेदहृद्यैकारं तृतीयस्वरं सर्वादौ सूर्याचंद्रमसेनमन्तु
नां कौवेरी विद्या अगस्त्यसंज्ञिता ६ सप्तमे धाम्नि तृतीयमेतस्या एव सर्वो
त्कायाः कामाद्यं शक्तिबीजं वाग्भवादौ तद्वाग्भवाद्यं मादनं तत्कामकलाल
योर्ध्वं शिवाद्यं तृतीयमिति नंदिविद्येयं ७ अष्टमे धाम्नि वाग्भवमागस्त्यं वाग
र्थं कलालयं कामकलालयं सहंसल्लमिति शक्तिः प्रभाकरी विद्येयं ८ नव
मे धाम्नि त्रिपुनरागस्त्यं वाग्भवं शिवशक्तिर्मन्मथशक्तिमन्मथमयं कामकला ५

त्वयंसूर्यचंद्राग्निगर्भ्भूर्ज्जेंदिमयंत्वतीयंषएत्त्वियंविद्या ९ दशमेथाग्निवि-
द्याप्रकाशितात्भूयएवागमस्यविद्यांपठित्वाभूयएवागमस्यमायांपरमशि-
वविद्या १० एकादशेथाग्निभूयएवागमस्यविद्यांपठित्वाएतस्यएववाग्भ-
वंयजुंस्सुवीजंकामकलालयं तत्सरुजेकृत्वालोपामुद्रायाःशक्तिकूटं
कूटराजंपठित्वावैश्नवीविद्या ११ द्वादशेथाग्निव्याख्याताइत्येतान्सरु
वाचभगवान्सर्वेषूयंत्कृत्वासर्वकामाख्यांविद्यांतुरीयरूपांतुरीयातीतां
सर्वोत्कटांसर्वमंत्रासनगतांपीठोपपीठदेवतापरिकृतां सकलव्यापि-
नीशाक्तधांसपरिवारांसहृदयांसामृतांसकलांसेंद्रियांसदोदितांपरा-
परांविद्यांस्मृत्वास्पष्टीकृत्वाहृदयेनिधायध्यानलयंगमयित्वात्रिकूटां
त्रिखंडांपरमांमायांश्रेष्ठांपरांवैश्नवींसन्निधायहृदयकमलकर्णिकायां
॥

श्री॰ परांभगवतींलक्ष्मींमायांसदोदितांमहावशंकरींमदनोन्मादिनींधनुर्वाणपा
५ शांकुशधारिणींवाग्बीजगर्भितांचंद्रमंडलमध्यवर्त्तिनीं चंद्रकलांसमदशी॰
5 महानित्योपस्थितांपाशांकुशधारिणींजपाणिपल्लवांसमुद्यदर्कनिभांत्रिनेत्रां
विचिंतयेद्देवींमहालक्ष्मींसर्वलक्षणसंपन्नांहृदयेचैतन्यरूपिणींजनरंजिनीं
त्रिकूटाख्यांस्मितमुखींमहामायांदेवींसुंदरींसर्वसुभगांमहाकुंडलिनींत्रि॰
पीठमध्यवर्त्तिनींअकथादिश्रीपीठेश्रीपराभैरवींचित्कलांमहात्रिपुरांदेवीं
ध्यायेद्ध्येयंमहाध्यानयोगेनेत्येवंवेदेतिमहोपनिषत् ॥ इत्यथर्वणीयेवेदपा
दावरणोपनिषत्प्रथमा १ अथातोजातवेदसेसुनवाममितिपठित्वात्रैपुरी
व्यक्तिर्वह्निपतेजातवेदसइत्येकर्चस्यसूक्तस्याद्यमध्यावसानेषु तत्तत्स्थानेषु
बीजस्फुरणांसागररूपंव्याचक्षते अथयस्तुतस्मानुवाचभगवान्जातवेदसे ५

स्तनवाममतंदंत्यमक्षार्णवंविलोमेनपठित्वाप्रथममस्याद्यंतद्भववदीर्घंद्विती
यस्याद्यंस्तनवामसोममित्यनेनकौलंवामंश्रेष्ठंसोमंमक्षासौभाग्यमाच
ष्टे सर्वसंपत्प्रभूतेप्रथमंनिकलिकाख्यांद्वितीयंस्थितिकारणांतृतीयं
सर्वकारणंइत्यनेनकरशुद्धिंकृत्वात्रिपुरांविद्यांस्पष्टीकृत्य जातवेदसेस
नवामसोममित्यादिपठित्वामक्षाविद्येश्वरींविद्यामाचष्टे त्रिपुरेश्वरी॰
जातवेदसमितिजातेत्याद्याक्षरैमातृकायाःशिवसितैवंयवमस्तरूपिणी
कुंडलिनीत्रिकोणरूपिणीचेतिवाक्यार्थः एवंप्रथमस्याद्यंवाग्भवमका
रंद्वितीयंकामकलालयंजातवेदसइत्यनेनपरमात्मनोज्रंभणांजातइ
त्यादिनापरमात्माशिवउच्यते जातमात्रेणकामीकामंकामयतका
मइत्यादिनाप्रणांव्याचष्टे तदेवस्तनवामसोमंगोत्राकुंठमध्यवर्ति

श्री नामतमयेनार्णेनमंत्रार्णेनस्पष्टीकृत्वागोत्रेतिप्रतिपाद्यते गोत्रेतिनाम्नि
६ गोत्रायामित्यादिनास्पष्टंकामकलालयंबीजंवामंसोमंसोमइत्यादिना
पूर्वेणाधुनाविद्येयंसर्वरत्नाकरीव्याचक्षते एवमनेनविद्यांत्रिपुरेश्वरी
स्पष्टीकृत्वा जातवेदसइत्यादिनाजातोवेदएकईश्वरःपरंज्योतिःमंत्रितो
वेत्तितुरीयंस्वरंदत्वाबिंदुपूर्णंज्योतिस्थानेकृत्वाप्रथमस्याद्यंस्वरूपं द्वि
तीयंचतृतीयंचसर्वरत्नाकरंसंबंधंचकृत्वाविद्यामात्मासनरूपिणींस्प
ष्टीकृत्वा जातवेदसेसुनवामसोममित्यादिपठित्वा आत्मरत्नाकरींवि
द्यांस्तुत्वाद्यंतयोर्थाग्नेःशक्तिशिवरूपिणींस्पष्टीकृत्वा विनियोज्यस
इतिज्ञानयात्मकंवर्णंसोममितिशैवात्मकंधामजानीयाद्योजानीतस
सुभगोभवति एवमेतांचक्रासनगतांत्रिपुरवासिनींविद्यांस्पष्टीकृत्वाज्ञा ६

तवेदसे सुनवाममसोममितिपठित्वा सूर्याणां त्रिपुरेश्वरीमिति विद्यां सदोदि
तां शिवपत्न्यात्मकामावेदितांज्ञा तवेदः शिवइतिमड्निशाग्न्यात्वरमि
ति शिवादिशाक्तांतांताधोलोलीभूतां त्रिकूटादिसंचारिणीं सूर्यचंद्रासन
स्थां मंत्रासनगतां त्रिपुरां महालक्ष्मीं सदोदितां स्पष्टीकृत्वा जातवेदसे
सुनवाममसोममित्यादिपठित्वा सूर्याणां सदात्मासनरूपां विद्यां स्मृत्वा पठि
त्वा वेदइत्यादिना विद्यासहितेनरोदेव्याः वैधवमनुपरिविन्यस्य सिद्धासनस्थां
त्रिपुरां वौविंदुमालिनीं विद्यां स्पष्टीकृत्वा जातवेदसे सुनवाममसोममि
त्यादिपठित्वा त्रिपुरां लक्ष्मीं स्मृत्वाग्निर्निर्दहति से वेयमग्न्यासनोज्वल
नीं विचिंत्य मूर्त्तिभूतां मूर्त्तिरूपिणीं सर्वसिद्धेश्वरीं त्रिपुरां विद्यां स्पष्टी
कृत्वा जातवेदसे सुनवाममसोममितिपठित्वा एवमेनामेव सनः पर्षद्

श्री॰ तिगुर्णाणि विश्वेत्यादिना पञ्चप्रकाशिनीं प्रत्यङ्गतां कार्यां विद्यामाक्रान्तकर्म
७ णि सर्वतोधिके तिव्याचक्षते एवमेतद्विद्याष्टकं महामायादेव्यंगभूतं व्या
7 चक्षते देवास्तवै भगवंतमब्रुवन्महाचक्रं नाम चक्रनायकं तन्नो ब्रूहि स
र्वकामिकं सर्वाराध्यं सर्वरूपं विश्वतोमुखं मोक्षद्वारं सद्यो योगिनमुपदिश्य
परब्रह्मापिभित्वा निर्वाणमुपदिशति तान्होवाच भगवन् श्रीचक्रं व्याख्या
स्याम इति त्रिकोणं अग्रं कृत्वा तदंतर्मध्यवर्त्तिनीमानयेच्छिरोग्रामाकृष्य
विशाले नीत्वा अग्रेतो योनिं कृत्वा पूर्वयोन्यग्ररूपिणीमानयेत् कृत्वा तां
सर्वार्धे नीत्वा योनिं कृत्वा आद्यं त्रिकोणं चक्रं भवति द्वितीयमंतरालं भव
ति तृतीयमष्टयोन्याङ्कितं चक्रं भवति अथाष्टारचक्राद्यंतवसुकोणाग्र
तोरेखां नीत्वा मध्याभ्यन्तराकर्षणवज्जरेखां नीत्वा इत्येवमूर्ध्वाधःसंपुट्या ७

न्यंकितं सर्वं योजयित्वा कर्णाभ्यां मूर्ध्नाग्रे रेखाचतुष्टयं कृत्वा यथाक्रमे-
णमानयष्टिद्वयेन दक्षायो न्यंकितं चक्रं भवति अनेनैव प्रकारेण पुनर्दशा-
रं चक्रं भवति मध्यत्रिकोणाग्रचतुष्टयाद्रेखाचतुष्टयमाकृष्योर्ध्वविलो-
मयोनि संपुटं कृत्वा मध्यचतुष्टयरेखाभ्यां रेखाचतुष्टयं दशाराद्यकोणेषु
संयोज्य तद्दशारान्तरं नीत्वा सर्वं योजयित्वा चतुर्दशारं चक्रं भवति ततोष्ट-
दलं सवृत्तं चक्रं भवति षोडशारं षोडशपत्रं सवृत्तं भवति पार्थिवं चक्रं
चतुर्द्वारं भवति एवमेव सृष्टिक्रमेण चक्रमाख्यातं एतन्नवात्मकं चक्रं प्र-
तिलोमेन च व्याख्यातं भवति प्रथमचक्रं त्रैलोक्यमोहनं भवति साणि-
माद्यष्टकं भवति सब्राह्म्याद्यष्टकं भवति सदशमुद्राधिष्ठितं भवति सप्रक-
टं भवति सत्रिपुराधिष्ठितं भवति सर्वसंक्षोभिणीमुद्रयाध्युष्टं भवति ११

श्री॰ द्वितीयंसर्वाशापरिपूरकंमंत्रालयंभवति कामाकर्षिण्यादिषोडशकला
८ युक्तंभवति सगुप्तंभवति त्रिपुरेश्वर्याधिष्ठितंभवति ससर्वविद्राविणीमु
४ द्रयाजुष्टंभवति २ तृतीयसर्वसंक्षोभणंचक्रंभवति सानंगकुसुमाद्यष्टकं
भवति सगुप्ततरंभवति सत्रिपुरसुंदर्याधिष्ठितंभवति ससर्वाकर्षिणी
मुद्रयाजुष्टंभवति ३ चतुर्थंसर्वसौभाग्यप्रदायकंचक्रंभवति ससर्वसंक्षो
भिण्यादिचतुर्दशशक्तियुक्तंभवति ससंप्रदायकंभवति सत्रिपुरवासि
न्याधिष्ठितंभवति ससर्ववशंकरीमुद्रयाजुष्टंभवति ४ तुरीयांतेसर्वा
र्थसाधकंचक्रंभवति ससर्वसिद्धिप्रदादेवीदशकंभवति सकुलालयंभ
वति समहालक्ष्म्याधिष्ठितंभवति ससर्वोन्मादिनीमुद्रयाजुष्टंभवति ५
षष्ठंसर्वरक्षाकरंचक्रंभवति ससर्वज्ञादिदशशक्तियुक्तंभवति सनिगर्भं २

संज्ञंभवति सत्रिपुरमालिन्याधिष्ठितंभवति सवर्गान्याद्यष्टकंभवति स
रहस्यसंज्ञंभवति सत्रिपुरसिद्धाव्याप्तंभवति सखेचरीमुद्रयाजुष्टंभ
वति ७ अष्टमंसर्वसिद्धिप्रदंचक्रंभवति सायुधचतुष्टयंभवति सका॰
मेश्वरीत्रिकंभवति सपरापररहस्यसंज्ञंभवति सत्रिपुरांबाधिष्ठितंभ॰
वति सबीजमुद्रयाजुष्टंभवति ८ नवमंसर्वानंदमयंचक्रनायकंचक्रंभ
वति सातिरहस्यंभवति समहात्रिपुरसुंदर्याधिष्ठितंभवति ससर्वानं
दमयंसंज्ञंभवति समहायोनिमुद्रयाजुष्टंभवति ९ ससंक्रामयतिसर्वा
णिहृद्यासिचैवचक्रपत्राणितद्देवचक्रंश्रीचक्रं तस्यनाभ्यामग्निमंडले
सूर्याचंद्रमसौतत्रोंकारपीठंप्रूजयित्वा तत्रादरविंदुरूपंतदंतर्गतंचि॰
ध्यामहापीठपरमांविद्यांसत्वात्रिपुरसुंदरीमावाह्यंक्षीरेणस्नापितेदेवि

श्री· २

चंदनेनविलेपिते विल्वपत्रार्चितेदेविदुर्गेहंशरणंगतः इत्येकर्वाप्रार्थ
यित्वामायालक्ष्मीमंत्रेणपूजयेत् ॐह्रींश्रींयावैदेवीवाभगवतीपंचदशानि
त्यात्रिकोणाद्युषितस्यैवैतेनमोनमः ॐह्रींश्रींयावैदेवीवाभगवतीश्रंका
मेश्वरीनित्यातस्यैवैतेनमोनमः ॐह्रींश्रीं यावैदेवीवाभगवतीश्रांभग
मालिनीतस्यैवैतेनमोनमः ॥इंनित्यक्लिन्नानित्यायैतस्यैवैतेनमोनमः २
॥ईंभीरुंडानित्यातस्यैवैतेनमोनमः ॥उंवह्निवासिनीनित्यातस्यैवैतेन
मोनमः ॥ऊंवज्रेश्वरीनित्यातस्यैवैतेनमोनमः ॥ऋंशिवादूतीनित्यात
स्यैवैते· ॥ॠंत्वरितानित्यातस्यैवैते· ॥लृंकुलसुंदरीनित्यातस्यैवैते· ॥
लॄंनित्यानित्यातस्यैवैते· ॥एंनीलपताकानित्यातस्यैवैते· ॥ऐंविजया
नित्यातस्यैवैते· ॥ओंसर्वमंगलानित्यातस्यैवैते· ॥औंज्वालामालिनीनित्या ३

तस्यैवैते· ॥अंचित्रानित्यातस्यैवैते· ॥अःमहात्रिपुरसुन्दरीनित्यातस्यै
वैते· ॥ह्रस्वचक्रेवायव्येरेखायांअणिमादिसिद्धिदशकंतस्यैवैते· ॥अणि
मासिद्धिस्तस्यैवैते· ॥लघिमासिद्धिस्तस्यैवैते· ॥महिमासिद्धिस्तस्यैवै·
॥ईशित्वसिद्धिस्तस्यैवैते· ॥वशित्वसिद्धिस्तस्यैवैते· ॥प्राकाम्यसिद्धि
स्तस्यैवै· ॥भुक्तिसिद्धिस्तस्यैवैते· ॥इच्छासिद्धिस्तस्यैवैते· ॥प्राप्तिसिद्धि
स्तस्यैवैते· ॥सर्वकामप्रदासिद्धिस्तस्यैवैते· ॥अंब्राह्म्याद्यष्टकंतस्यैवैते·
॥आंब्राह्मीतस्यैवैते· ॥ईंमाहेश्वरीतस्यै· ॥ऊंकौमारीतस्यै· ॥ऐंवैष्णवी
तस्यै· ॥ॡंवाराहीतस्यै· ॥ऐंऐन्द्राणीतस्यै· ॥औंचामुण्डातस्यै· ॥अःमहा
लक्ष्मीतस्यै· ॥द्रांसर्वसंक्षोभिणीमुद्रातस्यै· ॥द्रींसर्वविद्राविणीमुद्रा
तस्यै· ॥क्लींसर्वाकर्षिणीमुद्रातस्यै ॥ब्लूंसर्ववशंकरीमुद्रातस्यैवैते· १

श्री· ॐ सं सर्वोन्मादिनीमुद्रातस्यै· ॐ क्रों महांकुशामुद्रातस्यै· ॐ ह्स्खें खेचरीमुद्रा
१० तस्यै· ॐ ह्सौः बीजमुद्रातस्यै· ॐ योनिमुद्रातस्यै· ॐ क्रों महांकुशामुद्रातस्यै·
ॐ ह्स्रैं हसकलरीं ह्स्रौं त्रिखण्डामुद्रातस्यै· ॐ ह्सौः बीजमुद्रातस्यै· ॐ ह्स्खक्रीं खेच
10 रीमुद्रातस्यै· ॐ ऐं योनिमुद्रातस्यै· ॐ अं आं सौः प्रथमचक्रेश्वरी त्रिपुरातस्यै·
ॐ द्रां सर्वसंक्षोभिणीमुद्रातस्यै· ॐ अणिमासिद्धिस्तस्यै· ॐ कामाकर्षिण्या
त्रै दिषोडशकं तस्यै· ॐ अं कामाकर्षिणीतस्यै· ॐ आं बुद्ध्याकर्षिणीतस्यै· ॐ इं अ
हंकाराकर्षिणीतस्यै· ॐ ईं शब्दाकर्षिणीतस्यै· ॐ उं स्पर्शाकर्षिणीतस्यै· १
ॐ ऊं रूपाकर्षिणीतस्यै· ॐ ऋं रसाकर्षिणीतस्यै· ॐ ॠं गंधाकर्षिणीतस्यै· १
ॐ लृं चित्ताकर्षिणीतस्यै· ॐ ॡं धैर्याकर्षिणीतस्यै· ॐ एं स्मृत्याकर्षिणीतस्यै·
ॐ ऐं नामाकर्षिणीतस्यै· ॐ ओं बीजाकर्षिणीतस्यै· ॐ औं आत्माकर्षिणीतस्यै· १०

॰॰अं अमृताकर्षिणीतस्यै· ॰॰अः शरीराकर्षिणीतस्यै· ॰॰ऐं क्लीं सौः द्वितीय
चक्रेश्वरीत्रिपुरेश्वरीतस्यै· ॰॰द्रीं सर्वविद्राविणीमुद्रातस्यै· ॰॰लघिमासि
द्धितस्यै· ॰॰अनंगकुसुमाद्यष्टकेतस्यै· ॰॰कं खं अनंगकुसुमातस्यै· ॰॰चं छं अ
नंगमेखलातस्यै· ॰॰टं ठं अनंगमदनातस्यै· ॰॰तं थं अनंगमदनातुरातस्यै· ।
॰॰पं फं अनंगरेखातस्यै· ॰॰यं रं अनंगवेगिनीतस्यै· ॰॰शं षं अनंगांकुशातस्यै·
॰॰लं क्षं अनंगमालिनीतस्यै· ॰॰ह्रीं क्लीं सौः तृतीयचक्रेश्वरीत्रिपुरसुंदरीत
स्यै· ॰॰सर्वाकर्षिणीमुद्रातस्यै· ॰॰महिमासिद्धितस्यै· ॰॰सर्वसंक्षोभिण्या
दिचतुर्दशकेतस्यै· ॰॰कं सर्वसंक्षोभिणीशक्तितस्यै· ॰॰खं विद्राविणीशक्ति
तस्यै· ॰॰गं सर्वाकर्षिणीशक्तितस्यै· ॰॰घं सर्वाह्लादिनीशक्तितस्यै· ॰॰ङं स
र्वमोहिनीशक्तितस्यै· ॰॰चं सर्वस्तंभिनीशक्तितस्यै· ॰॰छं सर्वजृंभिनीशक्ति

श्री॰ स्तस्यै॰ ॐ ज सर्ववशंकरीशक्तिस्तस्यै॰ ॐ झं सर्वरंजनीशक्तिस्तस्यै॰ ॐ ञ स॰
११ र्वोन्मादिनीशक्तिस्तस्यै॰ ॐ टं सर्वार्थसाधनीशक्तिस्तस्यै॰ ॐ ठं सर्वसंपत्पूर
णीशक्तिस्तस्यै॰ ॐ डं सर्वमंत्रमयीशक्तिस्तस्यै॰ ॐ ढं सर्वद्वंद्वक्षयंकरीश॰
क्तिस्तस्यै॰ ॐ हैं ह्क्लीं ह्सौः चतुर्थचक्रेश्वरी त्रिपुरवासिनीतस्यै॰ ॐ णं सर्ववश
करीमुद्रातस्यै॰ ॐ ईं वशित्वसिद्धिस्तस्यै॰ ॐ सर्वसिद्धिप्रदादेवीदशकं तस्यै॰
ॐ णं सर्वसिद्धिप्रदादेवीतस्यै॰ ॐ तं सर्वसंपत्प्रदादेवीतस्यै॰ ॐ थं सर्वप्रियं
१२ करीदेवीतस्यै॰ ॐ दं सर्वमंगलकारिणीदेवीतस्यै॰ ॐ धं सर्वकामप्रपूरणीदेवी
तस्यै॰ ॐ नं सर्वदुःखविमोचिनीदेवीतस्यै॰ ॐ पं सर्वमृत्युप्रशमनीदेवीतस्यै॰
ॐ फं सर्वविघ्ननिवारिणीदेवीतस्यै॰ ॐ बं सर्वांगसुंदरीदेवीतस्यै॰ ॐ भं सर्व
सौभाग्यदायिनीदेवीतस्यै॰ ॐ हैं ह्स्क्लीं ह्सौः पंचमचक्रेश्वरीत्रिपुरातस्यै॰ ११

॥ ॐ सः सर्वोन्मादिनी मुद्रा तस्यै॰ ॐ वशित्वसिद्धिस्तस्यै॰ ॐ सर्वज्ञादिदशाके
तस्यै॰ ॐ मं सर्वज्ञादेवीस्तस्यै॰ ॐ यं सर्वशक्तिदेवी तस्यै॰ ॐ रं सर्वैश्वर्यप्रदा
देवी तस्यै॰ ॐ लं सर्वज्ञानमयीदेवी तस्यै॰ ॐ वं सर्वव्याधिविनाशिनीदेवी
तस्यै॰ ॐ शं सर्वाधारस्वरूपादेवी तस्यै॰ ॐ षं सर्वपापहरादेवी तस्यै॰ ॐ सं
सर्वानंदमयीदेवी तस्यै॰ ॐ हं सर्वरक्षास्वरूपिणीदेवी तस्यै॰ ॐ क्षः सर्वेप्सि
तफलप्रदादेवी तस्यै॰ ॐ ऐं क्लीं ह्सौः षष्टचक्रेश्वरी त्रिपुरमालिनी तस्यै॰ ॐ क्रों
महांकुशामुद्रा तस्यै॰ ॐ प्राकाम्यसिद्धिस्तस्यै॰ ॐ वशित्वाद्यष्टकं तस्यै॰ ॐ अं
आं इं ईं उं ऊं ऋं ॠं लृं लॄं एं ऐं ओं औं अं अः ब्लूं वशिनी वाग्देवता तस्यै॰ ॐ कं५क
ल्ह्रीं कामेश्वरी वाग्देवता तस्यै॰ ॐ चं५ ज्म्रीं मोदिनी वाग्देवता तस्यै॰ ॐ टं५य
लूं विमला वाग्देवता तस्यै॰ ॐ तं५ ज्म्रीं अरुणा वाग्देवता तस्यै॰ ॐ हसला

श्री॰ वशं जयिनीवाग्देवतातस्यै॰ ॐ ह्म्र्यूं भमरयूं सर्वेश्वरीवाग्देवतातस्यै॰ ॐ झ्म्र्यूं ह्स्म्रीं
१२ कौलिनीवाग्देवतातस्यै॰ ॐ ह्रीं श्रीं सौः सप्तमचक्रेश्वरीत्रिपुरासिद्धातस्यै॰
12 ॐ ह्स्खफ्रें खेचरीमुद्रातस्यै॰ ॐ भुक्तिसिद्धिस्तस्यै॰ ॐ सांतरालचतुष्टयदे
वतातस्यै॰ ॐ यां रां लां वां सां ह्रां ह्रीं क्लीं ब्लूं सः जं भ्रामणबाणरूपिणीतस्यै॰
ॐ धं थं मोहनकोदंडरूपिणीतस्यै॰ ॐ आं ह्रीं वशीकरणपाशरूपिणीतस्यै
वैते॰ ॐ क्रों क्रों स्तंभनांकुशरूपिणीतस्यै॰ ॐ कामेश्वर्यादिदेवतास्ताभ्य
स्तस्यै॰ ॐ वाग्भवकूटेश्वरीकामेश्वरीतस्यै॰ ॐ कामराजकूटेश्वरीवज्रेश्वरी
तस्यै॰ ॐ शक्तिकूटेश्वरीभगमालिनीतस्यै॰ ॐ ह्सैं ह्स्क्लीं ह्सौः अष्टमचक्रेश्व
रीत्रिपुराम्बातस्यै॰ ॐ ह्सौं बीजमुद्रातस्यै॰ ॐ इच्छासिद्धिस्तस्यै॰ ॐ ह्रीं श्रीं या
वैश्वाबाभगवतीह्सकलह्रीं ह्सकलह्रीं ह्सकलह्रीं त्रिपुरभैरवीतस्यै॰ १२

अथवा ॐ तुरीयविद्यामन्त्रार्थब्रह्मरंध्रेज्ञानपीठेश्रीचर्यानाथात्मिको
तुरीयातुरीयातीतदशाधिष्ठायकेपरब्रह्मात्मशक्तिर्देवचक्रेश्वरीश्री
महात्रिपुरसुंदरीतस्यै॰ ॐ ऐंमहायोनिमुद्रातस्यै॰ ॐ प्राप्तिसिद्धिस्तस्यै॰
ॐ ओंकारदेवतातस्यै॰ ॐ त्रिपुरात्रिपुरेश्वरीत्रिपुरवासिनीत्रिपुरमालिनी
त्रिपुरसिद्धात्रिपुराम्बात्रिपुरभैरवीदेव्यस्ताभ्यस्तस्यै॰ ॐ श्रीसर्वकार्यसि
द्धिस्तस्यै॰ ॐ श्रीं त्रिखंडामुद्रातस्यै॰ ॥ इत्यब्रवीद्भगवानित्येतैर्मंत्रैर्भगव
तीयजेत् ततोदेवीस्वात्मानंदर्शयति तस्माद्यएतैर्मंत्रैः यजतिसब्रह्म
णस्पतिंजयति सोमृतत्वंचगच्छतियएवंवेद ॥ इतिमहोपनिषत् इत्यथ
र्वणीयेमहाचक्रावरणोपनिषत् द्वितीया २ देवाहवैमुद्राः सृजेयमि
तिभगवंतमब्रुवन् तान्होवाचभगवानवनीकृतजानुमंडलोविस्तार

श्री·
१३
13

पद्मासनंकृत्वामुद्राःस्वज्ञेयमिति समसर्वानाकर्षयतियोयोनिमुद्रामधीते स
सर्ववेत्ति ससर्वाञ्जृम्भयति सद्वेषिणंस्तम्भयतियएवंवेद मध्यमेनानामिकोप
रिविन्यस्यकनिष्ठांगुष्ठरोधितेमुद्राथस्तर्जन्योर्दंडवद्धस्ताथेकत्रवद्धाप्रथमा
संपद्यते १ सैवामिलितमध्यमाद्वितीया २ सैवांकुशाकृतिस्तृतीया ३ प्रति
लोमेनपाणिनौसंदर्शयित्वांगुष्ठौसाग्रिमौसमाधायतुरीया ४ परस्परे
णमध्यमाकनीयसेवद्धानामिकेदंडिन्यौतर्जन्यावद्धालिंग्यानेनतिष्ठताम
ध्यमानवमीलितांगुष्ठौपंचमी ५ सैवांकुशौत्यंकुशाकृतिरितिषष्ठी ६ दक्षि
णहस्तेवामवाङ्कृत्वान्योन्यानामिकेकनीयसेमध्यमागतेतर्जन्याक्रांतेस
रलांगुष्ठौखेचरीमुद्रासप्तमी ७ सर्वार्थेसर्वखेचरीयमिति ७ स्वमध्यमाना
मिकांतरकनीयसेत्येवंवामतःपार्श्वयोस्तर्जन्यावंकुशाकृत्युपक्रान्तांगुष्ठया १३

न्योन्यंसमंजलीकृत्वाष्टमीसंपद्यतइति ८ परस्परमध्यमांगुष्ठवर्तिन्या
नामिकेतर्जन्याक्रांतेसमेमध्येस्थाद्याअंगुष्ठौमध्यमावर्तिनौनवमीसंपद्य
ते ९ सैवेयंकनीयसेसमेतवंगुष्ठौमध्यमावर्तिनौकृत्वात्रिखंडेयमापद्यते पं
चबाणाःपंचाद्याःस्युद्राःस्पष्टाःक्लीमरूद्वशेति हसखफ्रैं खेचरीमुद्रोवीजाष्ट
मी वाग्भवाद्याःमुद्रानवमी त्रिपुरांवावीजेनत्रिखंडाद्यामीसंपद्यतइतियए
वंवेद अथातःकामकलालयंचक्रंव्याख्यास्यामः क्लींक्लीऐंब्लूंस्त्रींएतेपंच
कामाःसर्वचक्रंव्यावर्तंते मध्यमेकामंसर्वावसानेसंपुटीकृत्वा ऐंब्लूंकारे
णासंपुटंव्याप्तषट्कंकृत्वादिभावेनमध्यमावर्तिनिसाध्यंवद्धाभूर्जपत्रेयाव
जयति एतच्चक्रंयोवेत्तिससर्वांल्लोकानाकर्षयति ससर्वविषाणिस्तंभय
ति नीलयतंचक्रंसर्वान्मारयति पीतद्रव्यैर्गतिंस्तंभयति लाक्षायकंकृ

श्री· त्वासकलांलोकान्वशंकरोति नवलक्षंजप्त्वारुद्रत्वंप्राप्नोति मातृकायावेष्टि
१७ तंकृत्वाविजयीभवति भगाकारंकुंडंकृत्वाग्निमादाय रुविषावशीकरोति
15 पुरुषोकृत्वात्रिकोणेमेधावीभवति वर्तुलंकृत्वाप्रियमतुलांप्राप्नोति च
तुरस्रेकृत्वावृद्धिर्भवति त्रिकोणेकृत्वाशत्रून्मारयतिस्तंभयति पुष्पाणि
कृत्वाविजयीभवति मधुरसेनकृत्वापरमानंदनिर्भरोभवति मधुरसाःष
ड्रसाः गणानांत्वागणपतिमित्येवमाद्यावरमंत्यविंदुपूर्णमित्यनेना-
नेनांगंस्पृशयति गंगणेशंनमस्कुर्यात् ॐनमोभस्मांगरागाय रुद्रतेजसे
हन२पच२मथ२विध्वंसय२हल२भंजय२स्फुलिस्फुलिंगेनजय२ सर्वसि-
द्धिंकुरु२ समुद्रंसर्वप्रतिष्ठितेवज्रदंष्ट्रिशोषय२ स्तंभय२ परयंत्रपरमंत्र
परतंत्रपरभूतपरवादच्छिंद२छिंधि२ क्लींफट्स्वाहा अनेनदेवंध्यात्वाप्रजये १७

तद्इति कुलकुमारिविद्महेमंत्रकोटिधीमहि तन्नःशक्तिःप्रचोदयात् ।
इतिकुलकुमार्यार्चनंकृत्वायोवैसाधकोभिलषतिसोमृतत्वंगच्छति स
यमाप्नोति सर्वमाप्नोति परमायुष्यमवाप्नोति परब्रह्मरूपोभूत्वा
तिष्ठत्येवंवेदेतिमहोपनिषत् ॥ इत्यथर्वशीर्षेतृतीयोपनिषत् ॐत्र्यंबकं
देवाह्वैभगवंतमब्रुवन्देवगायत्रंहृदयंव्याख्यातंत्रैपुरंसर्वोत्तमंजातवे
दससूक्तंव्याख्यातंतत्त्रैपुरंएकमेतत्दृष्ट्वामुच्यतेयोगीजन्मसंसारबंध ।
नादित्येवंब्रुवतां सर्वेषांदेवतानांश्रुत्वेदंवाक्यंइत्यथातोत्र्यंबकेनानुवा ।
क्येनमृत्युंजयंदर्शयति तस्मात्त्र्यंबकमिति त्रयाणांपुरुषाणामम्बकंस्वा
मिनंतस्मादुच्यतेत्र्यंबकमित्यथकस्मादुच्यते यजामहे इति यजामहेसेवा
महेस्तुमहेत्वमहे इत्यक्षरद्वयेनगणेशेनकूटत्वेनाक्षरेणामृतंजयमुच्यते ।

अथकस्मादुच्यते सुगंधिमिति सर्वतोयशःप्राप्नोति अथकस्मादुच्यते पु
ष्टिवर्धनमिति यःसर्वांल्लोकान्सृजति सर्वांल्लोकान्व्याप्नोति अथकस्मा
दुच्यते उर्वारुकमिवबंधनान्मृत्योरिति संलग्नत्वाद्बंधनादुर्वारुकमिव
मृत्योःसंसारबंधनान्मुक्तिर्भवति सम्मुक्तोभवति अथकस्मादुच्यते मोक्षी
यमामृतादित्यमृतत्वंप्राप्नोति अव्ययत्वंप्राप्नोतिनित्यत्वंप्राप्नोति स्वयं
रुद्रोभवति देवाह्वैभगवंतमूचुः सर्वंतेनाव्याप्तं अथकैर्मंत्रैःदेवीस्तुता
प्रीताभवति स्वात्मानंदर्शयति तान्सर्वान्शैवान्वैष्णवान्सौरान्गाणेशानो
ब्रूहीति सहोवाचभगवाञ्ज्येवकेनानुष्टुभेनमृत्युंजयमुपासयेत् पूर्वेणाध्य
नाव्यापममकाराद्दूरमितिस्मृतं ॐनमःशिवायेतियाजुषमंत्रेणोपासकोरु
द्रत्वंप्राप्नोतिशिवत्वंप्राप्नोतिकल्याणत्वंप्राप्नोतियएवंवेद ॥ तद्विष्णोःपरमं

पदंसदापश्यंतिसूरयः दिवीवचक्षुराततंतद्विप्रासोविपएयवोजागृवां
सःसमिंधतेविष्णोर्यत्परमंपदं विष्णोःसर्वतोमुखस्यात्मनोरूपस्यापलल
पिंडमोतप्रोतमवाग्मव्यतिरिक्तंव्याप्नुयादिति विष्णोर्यत्परमंपदंव्याप्नोति
युगपतीक्षते सूरयोब्रह्मादयोदेवामऽइतिसदाहृदयमादत्तेऽइति तस्माद्वि
ष्णोःस्वरूपंवसातितिष्ठतिभूतेष्वितिवासुदेवऽइति ॐनमऽइतिद्वौएषक्षरा
णिभगवतऽइतिचत्वारोवासुदेवायेतिपंचाक्षराएयेतद्वैवासुदेवस्यद्वादशा
र्णोपरमभ्यस्यतिसोपमृत्युंतरतिसर्वमाप्नोविंदते प्राजापत्यंरायस्पोषंगौ
पत्यंचसमश्नुते प्रत्यगानंदंब्रह्मपुरुषंप्रणवस्वरूपमकारोकारमकारऽइ
तित्तानवात्सैभवति तदेतदोमिति हंसःशुचिषदितिमंत्रकहंसऽइत्येतन्मनो
रन्तरद्वितीयेनप्रभावेणतेनसौरेण हृतगोजाप्रतजाप्रद्विजाप्तुकाःसत्याःप्र

श्री भाःपरंजन्याःसन्याभिःपूर्वंसोरमथीतेयः ससर्वफलमश्नुते सव्योऽस्मिपरम
१६ धाम्निसौरेणावसतेगणानांत्वेतित्रैष्टुभेनपूर्वेणाध्वनामन्तुनैकार्येनगण
16 पतिमभ्यर्च्य गणेशत्वंप्राप्नोति अथगायत्रीसावित्रीसरस्वतीअजपामातृ
काप्रोक्तातयासर्वमिदंव्याप्तं ऐंवागीश्वरिविद्महेक्लींकामेश्वरिधीमहि
सौःतन्नःशक्तिःप्रचोदयात् इतिगायत्रीप्रातःसावित्रीमध्याह्नेसरस्वतीसं
ध्यायामिति निरुत्तरमजपाहंसः इत्येवंमातृकापंचाशद्वर्णाविग्रहेणाका
रादिक्षकारांतेनव्याप्नोतिभुवनानिशास्त्राणिछंदांसि इत्येवंभगवतीस
र्वंव्याप्नोति इत्येवंभूर्भुवःस्वःतस्यैवैतेनमोनमः इतितान्भगवानाह इत्येतै
र्मंत्रैर्योनित्यंदेवींस्तौति ससर्वंपश्यति सोऽमृतत्वंगच्छति यएवंवेदेतिम
होपनिषत् इत्यथर्वणीयेत्रैपुरोपनिषत्समाप्ता ४ देवाहवैभगवंतमब्रु १६

वन्त्वामिनुःकथितंस्फुटंक्रियाकांडविषयैस्तुरमित्यथपरमंनिर्विषयं
कथयस्वेति तान्होवाचभगवान्तुरीयंमाययानिर्दिष्टंपरब्रह्मेति परमं
पुरुषंचिद्रूपंपरमात्मेति श्रोतामंताद्रष्टादेष्टाघ्रातादिष्टाविज्ञातासर्वेषा-
पुरुषाणामंतरेष्वपुरुषःसआत्मेतिविज्ञेयः तत्रलोका"नलोकाःवेदानवे
दाःपशवोनपशवःतापसोनतापसः पौल्कसोनपौल्कसःविप्रानविप्रस्तत्वे
कमेवापरंब्रह्मविभातिनिर्वाणं नतत्रदेवानऋषयोनपितरोनविषयाःशु-
त्येष्वनियतंप्रतिबुद्धंसर्वविद्येति अतोनिर्विषयंनित्यंमनःकार्यंमुमुक्षुणा
यतोनिर्विषयस्यास्यमनसोमुक्तिरिष्यते ॥ उंमनोहिद्विविधंप्रोक्तंशुद्धंचा
शुद्धमेवच अशुद्धंकामसंकल्पंशुद्धंकामविवर्जितं मनएवमनुष्याणांका
रणंबंधमोक्षयोः बंधायविषयासक्तोमुक्तिर्निर्विषयंमनः २ निरस्तविषया

श्री॰ सक्तंमोक्षंतंनिर्विषयंमनः ३ यदायात्युन्मनीभावंतदेवपरमंपदं तावदेवनिरोधव्यं
१२ यावद्धृद्गतंक्षयं ४ एतज्ज्ञानंचध्यानंचशेषोन्योग्रंथविस्तरः नैवचिंत्यंनचा
17 चिंत्यंभावंचाभव्यमेवच ५ पक्षपातविनिर्मुक्तंब्रह्मसंपद्यतेस्वयं स्वरेणसं-
धयेद्योगमस्वरंभावयेत्परं ६ अस्वरेणतुभावेणनाभावोभावइष्यते तदेव
निष्कलंब्रह्मनिर्विकल्पंनिरंजनं ७ तद्ब्रह्माहमितिज्ञात्वाब्रह्मसंपद्यतेक्रमा
त् निर्विकल्पमनंतंचहेतुदृष्टांतवर्जितं ८ अप्रमेयमनाद्यंचयज्ज्ञात्वामुच्य
तेबुधः ननिरोधोनचोत्पत्तिर्नबंधोनचसाधकः ९ नमुमुक्षुर्नवैमुक्तिरित्येषा
परमार्थता एकएवात्मामंतव्योजाग्रत्स्वप्नसुषुप्तिषु १० स्थानत्रयाव्यतीतस्य
पुनर्जन्मनविद्यते एकएवहिभूतात्माभूतेभूतेव्यवस्थितः ११ एकधाबहुधा
चैवदृश्यतेजलचंद्रवत् घटसंवृतमाकाशंविद्यमानेघटेयथा १२ घटेली १२

येतनाकाशंतद्वज्जीवोनभोपमः घटवद्विविधाकारंविद्यमानेद्यदेपुनः १३
तद्भेदेनचजानातिसंजानातिनचनित्यशः शब्दमायावृतोयावत्तावत्तिष्ठतिपु
ष्कलः १४ भिन्नेतमसिचैकत्वमेकएवानुपश्यति शब्दाक्षरंपरंब्रह्मतस्मि
न्क्षीणेयदक्षरं १५ तद्विद्वानक्षरंध्यायेद्यदीच्छेच्छांतिमात्मनः द्वेविद्येवे
दितव्येशब्दब्रह्मपरंचयत् १६ शब्दब्रह्मणिनिस्नातःपरंब्रह्माधिगच्छति
ग्रंथमभ्यस्यमेधावीज्ञानविज्ञानतत्परः १७ पलालमिवधान्यार्थीत्यजेद्ग्रं
थमशेषतः गवामनेकवर्णानांक्षीरस्याप्येकवर्णता १८ क्षीरंचपश्यति
ज्ञानंलिंगनाशेगवांयथा ज्ञाननेत्रंसमादायसमुद्धृत्यपरंपदं १९ निष्क
लंनिर्मलंशांतंतद्ब्रह्माहमितिस्मृतं इत्येकंपरमंब्रह्मस्वरूपंसर्वदेहिनां २०
सर्वभूताधिवासंतत्तरीयंयोजानीते सोक्षरेपरमेव्योम्न्यधिवसति यएवमे

श्री
१८
18

तांविद्यांतुरीयांब्रह्मयोनिस्वरूपां तामिहायुषेशरणमहंप्रपद्ये आका
शाद्युत्पन्नक्रमेणसर्वेषांवैतद्भूतानामाकाशादेवपराणिसर्वाणिरूपाइमा
निभूतान्याकाशादेवजायंते तस्मादेवजातानिजीवंति तस्मादाकाशंबीज
विद्यान्देवाकाशंबीजंपीठं ततःपीतममृतपीठंमनःपीठंरत्नपीठंजा
नीयाद्योजानीतेसोमृतत्वंगच्छति तस्मादेतांतुरीयांश्रीकामराजीयामे
कादशधाभिन्नमंत्रैर्नमितांजानीते सतुरीयंपदमाप्नोतीत्येवंवेदेतिमहो
पनिषत् ॥ ॥ इत्यथर्ववेणीयेपंचमीउपनिषत्संपूर्णासमाप्त सं १८५ काव
दित्रयोद:सूर्ये भास्करेणलिखितंब्रह्मब्राह्मणस्यार्थेलिखितं ॥ ॥ ॥ ॥